# चतुर्थः पाठः    स एव परमाणुः ।

विश्वस्य उत्पत्तिविषये नैके सिद्धान्ताः प्रतिपादिताः । नैके प्राचीनाः सिद्धान्ताः कालवशतां गताः नैके नूतनाः च वैज्ञानिकैः स्वीकृताः । 'Atom' इति शब्दः सर्वेषां सुपरिचितः एव । आधुनिकविज्ञानशास्त्रे 'Atom' इति मूलकारणं द्रव्यस्य । स एव 'Element' इति मन्यते । प्राचीनशास्त्रे तु 'परमाणुः' निर्मितेः मूलकारणम् इति कथितम् । परमाणोः वैशिष्ट्यानि महर्षिणा कणादमहोदयेन वैशेषिकदर्शने कथितानि । अस्मिन् विषये अधिकं संशोधनं शक्यम् ।




(अर्णवः जपाकुसुमं गृहीत्वा प्रविशति । तस्य पिता विज्ञानस्य प्राध्यापकः । सः पुस्तकपठने मग्नः । तस्य पार्श्वे उत्पीठिकायां सूक्ष्मेक्षिका वर्तते ।)

अर्णवः – पितः, अस्माकम् उद्यानाद् जपाकुसुमम् आनीतं मया । कियन्तः सूक्ष्माः तस्य परागकणाः !

पिता – सूक्ष्मेक्षिकया पश्य, तेषां कणानां रचनाम् अपि द्रष्टुं शक्नोषि ! (अर्णवः तथा करोति ।)

पिता – किं दृष्टं त्वया ?

अर्णवः – पितः, अद्भुतम् एतत् । अत्र परागकणस्य सूक्ष्माणि अङ्गानि दृश्यन्ते।



पिता – अर्णव, एतानि पुष्पस्य अङ्गानि त्वं सूक्ष्मेक्षिकया द्रष्टुं शक्नोषि। परन्तु एतद् विश्वं परमाणुभ्यः निर्मितम् । ते परमाणवः तु सूक्ष्मेक्षिकया अपि न दृश्यन्ते ।

अर्णवः – परमाणुः नाम किम् ?

पिता – अस्तु । कथयामि । मुष्टिमात्रान् तण्डुलान् महानसतः आनय ।

अर्णवः – (तथेति उक्त्वा पाकगृहात् तण्डुलान् आनयति ।) स्वीकरोतु, तात ।

पिता – अधुना इमं तण्डुलं विभज ।

अर्णवः – तात, कियान् लघुः अस्ति एषः । पश्यतु, एतस्य भागद्वयं यथाकथमपि कृतं मया ।

पिता – इतोऽपि लघुतरः भागः कर्तुं शक्यते वा ?

अर्णवः – यदि क्रियते तर्हि चूर्णं भवेत् तस्य ।

पिता – सम्यग् उक्तं त्वया । यत्र एतद् विभाजनं समाप्यते, यस्मात् सूक्ष्मतरः भागः प्राप्तुं न शक्यते सः एव परमः अणुः ।

अर्णवः – द्रव्यस्य अन्तिमः घटकः मूलं तत्त्वं च परमाणुः, सत्यं खलु ?

पिता – सत्यम्, अयं खलु कणादमहर्षेः सिद्धान्तः । अपि जानासि ? परमाणुः द्रव्यस्य मूलकारणम् इति तेन महर्षिणा प्रतिपादितम् । तदपि प्रायः ख्रिस्तपूर्वं पञ्चमे षष्ठे वा शतके ।

अर्णवः – तात, महर्षिणा कणादेन किं किम् उक्तं परमाणुविषये ? वयं तु केवलं तस्य महाभागस्य नामधेयम् एव जानीमः ।


पिता – कणादमुनिना प्रतिपादितम् – परमाणुः अतीन्द्रियः, सूक्ष्मः, निरवयवः, नित्यः, स्वयं व्यावर्तकः च। 'वैशेषिकसूत्राणि' इति स्वग्रन्थे तेन परमाणोः व्याख्या कृता ।

अर्णवः – का सा व्याख्या ?

पिता – **जालसूर्यमरीचिस्थं यत् सूक्ष्मं दृश्यते रजः ।**
**तस्य षष्ठतमो भागः परमाणुः स उच्यते ।।**

अर्णवः – अहम् एतद्विषये विस्तरेण पठितुम् इच्छामि ।

पिता – उत्तमम् ! श्वः मम महाविद्यालयम् आगच्छ । तत्र कणादविषयकाणि नैकानि पुस्तकानि सन्ति । तव जिज्ञासा निश्चयेन शाम्येत् ।



## भाषाभ्यासः

**१. पूर्णवाक्येन उत्तरं लिखत।**

अ) अर्णवः पाकगृहात् किम् आनयति ?

आ) कः परमाणुः ?

इ) परमाणुसिद्धान्तः केन महर्षिणा कथितः ?

ई) महर्षिणा कणादेन परमाणुविषये किं प्रतिपादितम् ?

उ) महर्षेः कणादस्य मतानुसारं परमाणोः व्याख्या का ?

**२. समानार्थकशब्दान् लिखत ।**

कुसुमम्, विश्वम्, पिता, नामधेयम्, सूर्यः ।

**३. माध्यमभाषया उत्तरं लिखत ।**

अ) महर्षिः कणादः परमाणुविषये किं प्रतिपादितवान् ?

आ) 'तण्डुलान् आनय' इति पिता अर्णवं किमर्थम् आदिष्टवान् ?

**४. विरुद्धार्थकशब्दान् मञ्जूषातःअन्विष्य लिखत ।**

सत्यम्, अन्तिमः, अनित्यः, लघुः, सूक्ष्मः,
(आद्यः, गुरुः, नित्यः, असत्यम्, स्थूलः)


**५. उचितं पर्यायं चित्वा लिखत ।**

अ) एतद् विश्वं ________ निर्मितम् । (तण्डुलैः/अणुभिः)

आ) ________ द्रव्यस्य मूलकारणम् । (परमाणुः/विज्ञानं)

इ) रजसः ________ भागः परमाणुः । (षष्ठतमः/शततमः)

**६. जालरेखाचित्रं पूरयत**




7LA3PK